# ૨ યોહનઃ પત્રં

I હે અભિરુચિતે કુરિયે, ત્વાં તવ પુત્રાંશ્ચ પ્રતિ પ્રાચીનોઽહં પત્રં
લિખામિ।
II સત્યમતાદ્ યુષ્માસુ મમ પ્રેમાસ્તિ કેવલં મમ નહિ કિન્તુ
સત્યમતજ્ઞાનાં સર્વ્વેષામેવ। યતઃ સત્યમતમ્ અસ્માસુ તિષ્ઠત્યનન્તકાલં
યાવચ્ચાસ્માસુ સ્થાસ્યતિ।
III પિતુરીશ્વરાત્ તત્પિતુઃ પુત્રાત્ પ્રભો ર્યીશુખ્રીષ્ટાચ્ચ પ્રાપ્યો ઽનુગ્રહઃ
કૃપા શાન્તિશ્ચ સત્યતાપ્રેમભ્યાં સાર્દ્ધં યુષ્માન્ અધિતિષ્ઠતુ।
IV વયં પિતૃતો યામ્ આજ્ઞાં પ્રાપ્તવન્તસ્તદનુસારેણ તવ કેચિદ્
આત્મજાઃ સત્યમતમ્ આચરન્ત્યેતસ્ય પ્રમાણં પ્રાપ્યાહં ભૃશમ્
આનન્દિતવાન્।
V સામ્પ્રતઞ્ચ હે કુરિયે, નવીનાં કાઞ્ચિદ્ આજ્ઞાં ન લિખન્નહમ્ આદિતો
લબ્ધામ્ આજ્ઞાં લિખન્ ત્વામ્ ઇદં વિનયે યદ્ અસ્માભિઃ પરસ્પરં પ્રેમ
કર્ત્તવ્યં।
VI અપરં પ્રેમૈતેન પ્રકાશતે યદ્ વયં તસ્યાજ્ઞા આચરેમ। આદિતો
યુષ્માભિ ર્યા શ્રુતા સેયમ્ આજ્ઞા સા ચ યુષ્માભિરાચરિતવ્યા।
VII યતો બહવઃ પ્રવઞ્ચકા જગત્ પ્રવિશ્ય યીશુખ્રીષ્ટો નરાવતારો
ભૂત્વાગત એતત્ નાઙ્ગીકુર્વ્વન્તિ સ એવ પ્રવઞ્ચકઃ ખ્રીષ્ટારિશ્ચાસ્તિ।
VIII અસ્માકં શ્રમો યત્ પણ્ડશ્રમો ન ભવેત્ કિન્તુ સમ્પૂર્ણં
વેતનમસ્માભિ ર્લભ્યેત તદર્થં સ્વાનધિ સાવધાના ભવતઃ।
IX યઃ કશ્ચિદ્ વિપથગામી ભૂત્વા ખ્રીષ્ટસ્ય શિક્ષાયાં ન તિષ્ઠતિ
સ ઈશ્વરં ન ધારયતિ ખ્રીષ્ટસ્ય શિજ્ઞાયાં યસ્તિષ્ઠતિ સ પિતરં પુત્રઞ્ચ
ધારયતિ।
X યઃ કશ્ચિદ્ યુષ્મત્સન્નિધિમાગચ્છન્ શિક્ષામેનાં નાનયતિ સ યુષ્માભિઃ
સ્વવેશ્મનિ ન ગૃહ્યતાં તવ મઙ્ગલં ભૂયાદિતિ વાગપિ તસ્મૈ ન કથ્યતાં।
XI યતસ્તવ મઙ્ગલં ભૂયાદિતિ વાચં યઃ કશ્ચિત્ તસ્મૈ કથયતિ સ તસ્ય
દુષ્કર્મ્મણામ્ અંશી ભવતિ।

XII યુષ્માન્ પ્રતિ મયા બહૂનિ લેખિતવ્યાનિ કિન્તુ પત્રમસીભ્યાં
તત્ કર્ત્તું નેચ્છામિ, યતો ઽસ્માકમ્ આનન્દો યથા સમ્પૂર્ણો ભવિષ્યતિ
તથા યુષ્મત્સમીપમુપસ્થાયાહં સમ્મુખીભૂય યુષ્માભિઃ સમ્ભાષિષ્ય ઇતિ
પ્રત્યાશા મમાસ્તે।
XIII તવાભિરુચિતાયા ભગિન્યા બાલકાસ્ત્વાં નમસ્કારં જ્ઞાપયન્તિ।
આમેન્।

# Sanskrit Bible (NT) in Gujarati Script
## New Testament in Sanskrit Language; printed in Gujarati Script

copyright © 2018 SanskritBible.in

Language: Sanskrit

Contributor: SanskritBible.in

Thank you for your interest in Sanskrit Bible.
Sanskrit Bible (NT) is freely available in 22 different scripts of your choice. This edition is in Gujarati script and is based on the Sanskrit translation of the Holy Bible published by Calcutta Baptist Missionaries in 1851. Please visit SanskritBible.in to learn more about Sanskrit Bible and to download various free Christian literature.

This translation is made available to you under the terms of the Creative Commons Attribution Share-Alike license 4.0.
You have permission to share and redistribute this Bible translation in any format and to make reasonable revisions and adaptations of this translation, provided that:

- You include the above copyright and source information.
- If you make any changes to the text, you must indicate that you did so in a way that makes it clear that the original licensor is not necessarily endorsing your changes.
- If you redistribute this text, you must distribute your contributions under the same license as the original.

Pictures included with Scriptures and other documents on this site are licensed just for use with those Scriptures and documents. For other uses, please contact the respective copyright owners.
Note that in addition to the rules above, revising and adapting God's Word involves a great responsibility to be true to God's Word. See Revelation 22:18-19.

2020-01-01

---

PDF generated using Haiola and XeLaTeX on 11 Nov 2022 from source files dated 29 Jan 2022
e1290797-4477-53f0-873d-c9153a72fd01